## शब्दविमर्शः - रप्रत्ययान्तशब्दानामवलोकनम्।

### 9. चन्द्रः।

रघुवंशस्य तृतीये रघुराज्याभिषेकं प्रस्तूय रघुदिग्विजयो नाम चतुर्थः सर्गः प्रारभ्यते। ननु प्रबन्धादौ महात्मानो दर्शनीयास्तत्कवेर्वाल्मीकेरनुमतमित्युपक्रम्य कथं दिग्विजयः प्रस्तूयते कञ्चिदात्मनः शत्रुं परिकल्प्य तं पराजिगीषोरस्य रघोः शास्त्रविरुद्धाचारवतः। 'आत्मवत्सततं पश्येदपि कीटपिपीलिकम्। न कश्चिदात्मनश्शत्रुं नात्मानं कस्यचिद्रुपुम्।' इति हि शास्त्रम्। किं तच्छास्त्रम्। आयुर्वेदः। कथमायुर्वेदस्य चिकित्साशास्त्रस्य धार्मिकेषु विषयेषु प्रवेशः। प्रवेशोऽस्ति। 'कालार्थकर्मणां योगो हीनमिथ्यातिमात्रकाः। सम्यग्योगश्च विज्ञेयो रोगारोग्यैककारणम्।' इत्यष्टाङ्गहृदयम्। 'हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्। मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते' इति चरकसंहिता। एवं 'धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्। रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च।।' इति भैषज्यरत्नावली। एवं खलु शास्त्राणि। नैतेन भवतां दोषारोपेण भीत्यैनं सर्गमेव त्यक्तुमना इति व्यमुहत्। रप्रत्ययान्तशब्दा उद्धर्तव्या इत्यस्माकमाग्रहः। तदर्थं काव्यानुसन्धानम्। लक्ष्यं सिद्ध्येत्तर्हि सफलमनोरथाः स्मः। तथा हि 'यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा। तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात्।।' (रघुवंशम् 4.12)। यथा चन्दयत्याह्लादयति चन्द्र इन्दुः। आह्लादकरणादन्वर्थनामकोऽभूत्। यथा च तपतीति तपनः सूर्यः प्रतापादन्वर्थः। तथैव स राजा प्रकृतिरञ्जनादन्वर्थः सार्थकराजशब्दोऽभूदिति भावः।

क्व चायं रप्रत्ययान्तः शब्दोऽत्र। चन्द्र इति। चदि आह्लादने दीप्तौ च (भ्वा 58) इत्यस्माद्धातोरौणादिको रप्रत्ययः इति व्याख्याकारो महामहोपाध्यायो मल्लिनाथः। अयं खलु रसिकशिरोमणिः विद्याविचक्षणो वैय्याकरणमूर्धन्यः काव्यान् सनाथीचकार स्वीयैरमोघै व्याख्यानैः। कोशकारा अपि। यथा वाचस्पत्यम् चन्द्रशब्दं पुंसि प्रयुज्यमानं आह्लादार्थकात् चदि धातोः णिजन्तात् रक् प्रत्ययान्तं व्याख्याति। व्योमस्थे जलमये मण्डलाकारे ख्याते पदार्थे इत्यर्थं निर्दिशति। अथवा चदि दीप्तौ इत्यस्मात् रक् इत्यपि तत्रैवोक्तम्। कथं भिन्नार्थकत्वम्। न खल्वामूलतो भिन्नोऽर्थः। तद्दृश्यतां शब्दकल्पद्रुमः। चन्द्रशब्दः पुंसि 'चन्दयति आह्लादयति चन्दति दीप्यते इति वा'। चन्द् + 'स्फायितञ्चीति' रक्। इत्यर्थनिर्देशं करोति। चन्द्र आह्लादकरो दीपकरश्च। अमरस्तु 'हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः। इति दिग्वर्गे। 'काम्पिल्यः कर्कशश्चन्द्रो रक्ताङ्को रोचनीत्यपि' इति वनौषधिवर्गे। ननु च कथं

द्वेधा प्रतिपत्तिरिति चेन्नात्र प्रतिपत्तिगौरवं पश्यामः। आद्य ओषधीनां पतिः। द्वितीय ओषधिविशेषः। ननु चात्र विरोधः व्याख्याकारस्य कोशेन। अन्यतरेण साधुना भाव्यमिति चेन्न। उभयस्यापि साधुत्वमन्वाख्यातुं शक्यम्। यतो हि व्याकरणं शब्दानां साधुत्वान्वाख्यानमात्रं करोति। अर्थो लेकसिद्धः। तदुक्तं भाष्ये 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति। अत एव 'कर्पूरं घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' इति मनुष्यवर्गः 'स्वर्णेऽपि भूरिचन्द्रौ द्वौ इति नानार्थवर्गश्चामरकोशकारस्य सार्थकः। बहवो रप्रत्ययान्ताः शब्दाः प्रयुज्यन्ते तेषां दिङ्मात्रमिह प्रदर्शितम्।

***

## 10. मुखरः।

किरातार्जुनीयस्य तृतीये सर्गे व्यासमुनिस्वरूपवर्णनम्। व्यासयुधिष्ठिरभाषणम्। अर्जुनं प्रति मुनिकृतो विद्योपदेशः। तपश्चर्यार्थं निदेशश्च। ततो मुनिगमनम्। अर्जुनस्य गमनोपक्रमः। पाण्डवानां भाव्यर्जुनवियोगेन वैमनस्यम्। अर्ज ुनकृतं द्रौपदीविलोकनम्। अर्जुनं प्रति द्रौपदीवाक्यम्। व्यासाज्ञप्तेन गुह्यकेन सहार्जुनस्येन्द्रकीलं नाम हिमालयपादविशेषं प्रति प्रस्थानमित्यादयो वर्णनांशाः। तत्र पौरुषैकधनानां धार्मिकाणां पाण्डवानामन्तिकमागतं व्यासमुनिमभिसम्बोध्य युधिष्ठिर इत्थमुवाच 'निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम्। तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति।।' (3.9) इति। प्रश्नकुतूहलित्वं निरास्पदम्। त्वदागमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः। यतो हि निःस्पृहाणां युष्मादृशामस्मास्वधीनमायत्तं किमु। न किञ्चिदस्मत्तो लभ्यमिति भावः। तथापि कल्याणकरीम् = अस्मद्धितैकहेतुम्। ते गिरं श्रोतुमिच्छा मां मुखरीकरोति। व्याहारयतीत्यिर्थः। निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वाच्छ्रोतव्यमिति भावः। मुखरशब्दो रप्रत्ययान्तस्तद्धितः। मुखं वागस्यास्तीति मुखरो निरन्तरभाषी। 'ऊषसुषिमुष्कमधो रः' (5.2.107) इति सूत्रेण मत्वर्थीयो रप्रत्ययो विहितः। तस्मिन् प्रकरणे 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्' इति वर्तिकेन रः। प्रकृते च ततश्च्विप्रत्ययः। 'दुर्मुखे मुखराबद्धमुखौ' इत्यमरः। मुखरो नाम वाचालः। 'एका भार्या प्रकृतिमुखरा चञ्चला च द्वितीया' इत्युद्भटः। तथा मृच्छिकटिकस्य प्रथमेऽङ्के 'त्वां सूचयिष्यति तु माल्यसमुद्भवोऽयं गन्धश्च भीरु!

मुखराणि च नूपुराणि'। एवं खमस्यास्ति कण्ठविवरं महत् खरो गर्दभः। कुञ्जावस्य स्तः कुञ्जरः। हस्तिहनू कुञ्जशब्देनोच्यते।

कुमारसम्भवस्यैकादशे सर्गे कुमारोत्पत्तिमुपवर्ण्य कुमारसैनापत्यवर्णनं नाम्नि द्वादशे सर्गे 'महाहवे नाथ तवास्य सूनोः शस्त्रैः शितैः कृत्तशिरोधराणाम्। महासुराणां रमणीविलापैर्दिशो दशैता मुखरीभवन्तु।।' (12.51)। हे नाथ महति सङ्ग्रामेऽस्य पुरोवर्तिनस्तव पुत्रस्य शितैस्तीक्ष्णैः शस्त्रैः करवालादिभिः कृत्तशिरोधराणां महासुराणां तारकपक्षाश्रयिणां रमणीनां विलापैर्वैधव्यप्रयुक्तप्रलापैरेता दश दिशो मुखरीभवन्तु वावदूका भवन्त्विति भावः। 'रप्रकरणे खमुखकुञ्जेभ्य उपसॅख्यानम्' इति वर्तिकेन रः। भोः अबलास्त्रियः। कच्चित् तद्वैधव्यप्रयुक्तं श्रेय आत्मन इच्छेत् कश्चित्। तदपि देवैः खलूच्यते। अये उदाहरणेष्वस्माकं दृष्टिः। न पुनर्धार्मिकविषयेषु कथानकेषु। रप्रत्ययान्तस्य मुखरशब्दस्य कुत्रचित्प्रयोगविषयमन्विषद्भिरस्माभिरिदमुपलब्धम्। तत्प्रस्तुतम्।

वर्तिकान्तरमुपलभ्यतेऽस्मिन्नेव प्रकरणे 'नगपांशुपाण्डुभ्यश्चेति वक्तव्यम्' इति। नगाः = वृक्षाः पर्वता वा सन्त्यत्रेति नगरम्। शैलवृक्षौ नगावगावित्यमरः। पाण्डुः शुक्लो वर्णः तद्वत्पाण्डुरः। पांशुर्धूलिः। रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः। तदस्त्यस्येति पांशुरम्। अन्यच्च वार्तिकं 'कच्छ्वा ह्रस्वत्वञ्च' कच्छुरम्। समौ पामनकच्छुरावित्यमरः। सस्यविशेषः रोगविशेषो वा।

'ज्योत्स्नातमिस्राश्रृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः' (5.2.114) इत्यनेन सूत्रेण ज्योत्स्नादयः शब्दाः मत्वर्थे संज्ञायां विषये निपात्यन्ते। इष्टसिद्ध्यै निपातनम्। सामान्यैः विहितैः शास्त्रैः यत्र इष्टं न सेत्स्यति तत्र निपातनमाश्रियते। तथा चैहैतेषु तमस उपधाया इकारो रश्च प्रत्ययः। तमिस्रा रात्रिः। तमिस्रा तामसी रात्रिरित्यमरः।

'वुञ्छण्कठजिल…………' (4.2.80)। इति सूत्रेण वुञ्चादयः सप्तदशप्रत्ययाः तत्प्रकृतिका अरीहणादयोऽपि सप्तदशप्रातिपदिकगणा निर्दिष्टाः। तेष्वश्मादिरन्यतमो गणः येभ्यो रप्रत्ययो भवति। अश्मरः। पामर इत्यादि।

अन्यत्र 'ह्रस्वे' (5.3.86) इत्यधिकारे ह्रस्वत्वविशिष्टेऽर्थे 'कुटीशमीशुण्डाभ्यो रः" (5.3.88) इति सूत्रेण कुटीशमीशुण्डाभ्यो ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति। ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः।

एतेन तद्धितेषु द्वित्राः रप्रत्ययान्तशब्दा उदाहृताः। उणादिष्वपि बहवो रप्रत्ययान्तशब्दा उपलभ्यन्ते। उदाहरणार्थ मीषदुच्यते। ननूणादयोऽव्युत्पन्नानीत्यतः कथं तेषां व्युत्पत्तिः प्रदर्श्यते इति चेन्न सर्वात्मनाऽव्युत्पन्नानि प्रत्युत पाणिनीयदिशा सर्वथा प्रक्रिया न सिद्ध्यतीत्यर्थः। अतस्तेषामपि प्रक्रिया सामान्यतः प्रदर्शयितुं शक्या।

***